MSS No. 14 Subject Religion

Name of MSS Katyāyani Tarpan Pryog: कात्यायनी तर्पण प्रयोग:

Author Not available

Period — — Folios 7 (00a + 1to5, 10)

Script Source Prithipal Singh

Missing Folios 6 to 9

2/4.1

A. no. ~~15~~ 14

~~15~~

KATYAYANI TARPANA PRAYOG

(8 lines to a page)
Sanskrit

का अे तानी
तर पन पअो

(14)

Sans. MS.
294.1
K19
14

न॰
१

श्रीगणेशाय नमः ॥ अथ कात्यायनीतर्पणप्रयोगः ॥ ॐ ब्रह्मास्तृप्यंतां ॥ १
ॐ विष्णुस्तृप्यतां ॥ २ ॐ रुद्रस्तृप्यतां ॥ ३ ॐ प्रजापतिस्तृप्यतां ॥ ४ ॐ देवास्तृ
प्यंतां ॥ ५ ॐ छंदांसि तृप्यंतां ॥ ६ ॐ वेदास्तृप्यंतां ॥ ७ ॐ ऋषयस्तृप्यंतां ॥ ८
पुराणाचार्यास्तृप्यंतां ॥ ९ ॐ गंधर्वास्तृप्यंतां ॥ १० ॐ इतराचार्यास्तृप्यंतां ॥ ११
ॐ संवत्सरः सावयवस्तृप्यतां ॥ १२ ॐ देव्यस्तृप्यंतां ॥ १३ ॐ अप्सरसस्तृप्यंतां
१४ ॐ देवानुगास्तृप्यंतां ॥ १५ ॐ नागास्तृप्यंतां ॥ १६ ॐ सागरास्तृप्यंतां
१७ पर्वतास्तृप्यंतां ॥ १८ ॐ सरितस्तृप्यंतां ॥ १९ ॐ मनुष्यास्तृप्यंतां ॥ २०
ॐ यक्षास्तृप्यंतां ॥ २१ रक्षांसि तृप्यंतां ॥ २२ ॐ पिशाचास्तृप्यंतां ॥ २३ ॐ सुप

१

एस्तृप्यंतां ॥२४॥ ॐ भूतानित्तृप्यंतां ॥२५॥ ॐ पशवस्तृप्यंतां ॥२६॥ ॐ वनस्प
प तयस्तृप्यंतां ॥२७॥ ॐ ओषधयस्तृप्यंतां ॥२८॥ ॐ भूतग्रामश्चतुर्विधस्तृप्यंतां
॥२९॥ उपवीती प्राङ्मुख उदङ्मुखो वा देवतीर्थेन यवोदकेन उद
केनैव वा तर्पयेत् ततः मरीचिस्तृप्यंतां ॥ ॐ अत्रिस्तृप्यंतां ॥ ॐ अंगि
रास्तृप्यंतां ॥ ॐ पुलस्त्यस्तृप्यंतां ॥ ॐ पुलहस्तृप्यंतां ॥ ॐ क्रतुस्तृप्यंतां ॥
ॐ प्रचेतास्तृप्यंतां ॥ ॐ वसिष्ठस्तृप्यंतां ॥ ॐ भृगुस्तृप्यंतां ॥ ॐ नारदस्तृ
प्यंतां ॥१ इति ऋषीन् देववत् ततः ॐ सनकस्तृप्यंतां ॥ ॐ सनंदनस्तृ
प्यंतां ॥ ॐ सनातनस्तृप्यंतां ॥ ॐ कपिलस्तृप्यंतां ॥ ॐ आसुरिस्तृप्य

त
२

तां॥ ॐ वोढुं स्तृप्यंतां॥ ॐ पंचशिखस्तृप्यंतां॥ इति मनुष्यान्निवीती का
यतीर्थेन निविशेषः॥॥ ॐ कव्यवालस्तृप्यंतामिदं जलं सतिलोदकं
तस्मै स्वधानमः॥ ॐ नलस्तृप्यंतामिदं जलं सतिलोदकं तस्मै स्वधान
मः॥ ॐ सोमस्तृप्यंतामिदं तिलोदकं तस्मै स्वधानमः॥ ॐ यमस्तृप्यंता
मिदं तिलोदकं तस्मै स्वधानमः॥ ॐ अर्यमास्तृप्यंतामिदं तिलोदकं तस्मै
स्वधानमः॥ ॐ अग्निष्वात्तास्तृप्यंतामिदं तिलोदकं तेभ्यः स्वधानमः॥ ॐ
सोमपास्तृप्यंतामिदं तिलोदकं तेभ्यः स्वधानमः॥ ॐ बर्हिषदस्तृप्यंतां
मिदं तिलोदकं तेभ्यः स्वधानमः॥ इति दिव्यपितॄन् प्राचीनावीती॥ दति

णाभिस्तुरवः ॥ पानि नवाम जानुः ॥ सतिलञ्जलांजलित्रयेणपितृतीर्थे
नतर्पयेत् ॥ ननः ॥ ॐ यमायनमः ॥ ॐ धर्मराजायनमः ॥ ॐ मृत्यवेनमः ॥
ॐ अंतकाय नमः ॥ वैवस्वतायनमः ॥ ॐ कालायनमः ॥ ॐ सर्वभूतक्षयाय
नमः ॥ ॐ उदुंबरायनमः ॥ ॐ दध्नायनमः ॥ ॐ नीलायनमः ॥ ॐ परमेष्ठि
नेनमः ॥ ॐ वृकोदरायनमः ॥ चित्रायनमः ॥ ॐ चित्रगुप्तायनमः ॥ इतित
र्दक्षायमान्प्रत्येकं सतिलजलांजलित्रयेण ॥ ॥ ॐ आगच्छंतुमे
पितरइमं गृह्णंत्वयोंजलिमिति पितृनावाह्य ॥ ॐ उदीरतामवरउ
त्परासउन्मध्यमाः पितरः सोम्यासः ॥ असुंयईयुरवृकाऋतज्ञास्ते

त नोचैवं तु पितरो हवेषु ॥ ॐ अद्याऽमुकगोत्रः पिताऽमुकशर्मा तृप्यतामिदं
२ जलं सतिलं तस्मै स्वधा इति मंत्रेण वाक्येन च प्रथमं मंजलिं पित्रे दद्यात् ॥
ॐ अंगिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ॥ तेषां वयं
सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ इति मंत्रेण वाक्येन च द्वि
तीयं ॥ ॐ आयंतु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः
तु४ अस्मिन् यज्ञे स्वधया मदंतोऽधिब्रुवंतु तेऽवंत्वस्मान् ॥ इति मंत्रेण च वाक्येन
च तृतीयमंजलिं पित्रे दद्यात् ॥ ततः ऊर्जं वहंतीरमृतं घृतं पयः कीलालं
परिस्रुतं स्वधास्थ तर्पयत मे पितॄन् ॥ ॐ अद्याऽमुकगोत्रः पितामहो ३

ऽमुकशर्मोन्त्यप्यता मिदंजलंस तिलं नम्सै स्वधा ॥ इति प्रथमं ॥ ॐ पितृ
भ्यः स्वधायि भ्यः स्वधायनमः ॥ पितामहेभ्यः स्वधायिभ्यः स्वधानमः ॥
प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः ॥ अक्षन्न पितरोमी मदंत पि
तरोतीतृपंत पितरः शुंधध्वं ॥ इति मंत्रेण वाक्येन च द्वितीयं ॥ ॐ ये
येवेह पितरो ये च नेह यां श्च विद्म यांउ च न प्रविद्म त्वं वेत्थ यति ते जा
तवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व इति मंत्रेण वाक्येन चतृतीयं ॥ त
त. ॥ ॐ मधुवाताऋतायते मधुक्षरं ति सिंधवः ॥ माध्वीर्नः संत्वोषधीः ॥ ॐ
अमुक गोत्रः प्रपितामहोऽमुकशर्मोन्त्यप्यता मिदंजलंस तिलं नम्सै ॥

त स्वधा इति प्रथमं ॥ ॐ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳ रजः ॥ म
ध धुद्यौरस्तु नः पिता इति मंत्रेण वाक्येन च द्वितीयं ॥ ॐ मधुमान्नो वनस्प
तिर्मधुमाँ अस्तु सूर्यः ॥ माध्वीर्गावो भवन्तु नः ॥ इति मंत्रेण वाक्येन च तृ
तीयमंजलिं प्रपितामहाय दद्यात् ॥ इति त्वप्पध्मिति पित्रादिभ्यो
ञ्जलित्रयं दद्यात् ॥ ॐ नमो वः पितरो रसाय नमो वः पितरः शोषा
य नमो वः पितरो जीवाय ॥ नमो वः पितरः स्वधायै ॥ नमो वः पितरो घो
राय । नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः
पितरो दत्त सतो वः पितरो देष्मैतन्नः पितरो वास इति मंत्रं पठित्वा ॥ ५

अमुकगोत्रमातामहोऽमुकशर्मोन्तृप्यतामिदं जलं सतिलं तस्मै स्वधा॥ इति मातामहाय अंजलित्रयं दद्यात्॥ एवं प्रमातामहाय वृद्धप्रमातामहायापि॥ ततः ॐ अद्याऽमुकगोत्रा मातामहामुकदेवी तृप्यतामिदं जलं सतिलं तस्यै स्वधा॥ इति मातरं॥ एवमेव पितामही प्रपितामही मातामही प्रमातामही वृद्धप्रमातामही स्तर्पयेत्॥ ततश्चाचार्यादीन्नामगोत्रस्वधाकारैस्तर्पयेत्॥ विष्णुपुराणे॥ इदं चापि जपेदंबु दद्यादात्मेच्छया नृप॥ उपकाराय भूतानां कृतदेवादितर्पणः॥ देवासुरास्तथा यक्षा नागा गंधर्वराक्षसाः॥ पि

त
५

शाचागुह्यकाः सिद्धाः कूष्मांडास्तरवः खगाः। जलेचराभूनिलयावा
य्वाधाराश्च जंतवः॥ प्रीतिमेते प्रयांत्वाशु मद्दत्तेनांबुनाखिलाः॥ न
रकेषु समस्तेषु यातनासु च ये स्थिताः॥ तेषामप्यायनायैतद्दीयते स
लिलं मयेति॥ ये बांधवा अबांधवा येन्यजन्मनि बांधवाः॥ ते तृप्तिम
खिलां यांतु यश्चास्मत्तोभिवांछति॥ इदं च काम्यं तर्पणमेभिरेव श्लो
कैर्दैवविधिना कर्तव्यं॥ अथवस्त्रविधिः॥ स्नानासाट्यांतुदातव्यास्तदस्ति
लो विशुद्धये॥ पराशरः॥ जलमध्ये तु यः कश्चिद्द्विजातिर्ज्ञानदुर्बलः॥ निः
पीडयति तद्वस्त्रं स्नानं तस्य वृथा भवेत्॥ योगियाज्ञवल्क्यः॥ अवप ५

हेरक्तवाससं चतुर्दश्यंमर्चयंतेभक्त्यादेवंजनार्दनं ॥१२॥ उपग
म्यशनैः शीलापप्रच्छस्त्रीकदंबकं ॥ आर्याः किमेतन्मेब्रूत किंनाम
व्रतमीदृशं ॥१३॥ ताऊचुर्योषितस्तांतुशीलांशीलविभूषणां ॥ अ
नंतव्रतमेतद्धिव्रतेनंतस्तुपूज्यते ॥१४॥ साब्रवीदहमप्येनत्करि
ष्येव्रतमुत्तमं ॥ विधानंकीदृशंतत्रकिंदानंकोत्रपूज्यते ॥१५॥ स्त्रिय
ऊचुः ॥ शीलेसदन्नप्रस्थस्यपुंनाम्नासंस्कृतस्यच ॥ अर्द्धंविप्रायदा
तव्यमर्द्धमात्मनिभोजनं ॥१६॥ शक्त्यावदद्दिणांदद्याद्वित्तशाठ्यवि
वर्जितः ॥ कर्त्तव्यंसत्सरित्तीरेविधिनानेनभामिनि ॥१७॥ स्नात्वानं

कस्तूरिकया: सौभाग्येन ताम्रं दस्य चाकुंकुमस्य त्रयस्त्रिंशकं स्थापितं स्याच्छुनः समर्पितानाम्

तसमभ्यर्च्यमंडलेधूपदीपकैः पुष्पैर्गंधैश्चनैवेद्यैःपीतरक्तैश्चतंतुः

अ० सभैः ३८ चतुःसमंपरिभाषायांज्ञेयं तस्याग्रतोहृढंसूत्रंकुंकु

१० मांक्तसुडोरकं ३९ चतुर्दशग्रंथियुतंवामेकरनलेन्यसेत् अनं

नसंसारमहासमुद्रमग्नंसमभ्युद्धरवासुदेव अनंतरूपेविनियो

जयस्व अनंतरूपायनमोनमस्ते ४० अनेनडोरकंवध्वाभोक्तव्यं

स्वस्थमानसैः ध्यात्वानारायणंदेवमनंतंविश्वरूपिणं ४१ भु

क्त्वांतेवृजेद्वेश्मभद्रप्रोक्तंनव श्रीकृष्णउवाच एवमाकर्ण्यराजेंद्र

पद्दिष्टेनांतरात्मना ४२ सापिचक्रे तंशीलाकरेवध्वासुडोरकं ॥ १०

स्त्री पुमान् दक्षिणे तथा तु सर्वेषां करे प्रदापय कर्म ३॥

प्रतेर